दिनाङ्कः-18.01.2026

प्रातः - 06:55

<u>पीएम-अमृत भारतः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य पश्चिमबङ्गाल-अस्साम्-राज्ययोः पञ्च नूतनानि अमृतभारत्-एक्स्प्रेस्-रेलयानानि हरितध्वज-प्रदर्शनपूर्वकं समारप्स्यन्ते। सः पश्चिमवङ्गस्य हुग्ली-नगरात् त्रीणि रेलयानानि समारप्स्यति। एतानि रेलयानानि सन्ति-हावडा-आनन्दविहार-टर्मिनल्-अमृतभारत्-एक्स्प्रेस्, सियालदह-बनारस्-एक्स्प्रेस्, सन्तोरागाची-ताम्बरम्-अमृतभारत्-एक्स्प्रेस् इत्येतानि च। असम-राज्यस्य नौगांव-जनपदस्य कालियाबोर-नगरे नूतनयोः अमृतभारत्-एक्स्प्रेस्-रेलयानयोः शुभारम्भोऽपि प्रधानमन्त्री करिष्यति। एतानि रेलयानानि सन्ति-कामाख्या-रोहतक-अमृतभारत एक्स्प्रेस, डिब्रूगढ-लखनऊ (गोमतीनगरम्) अमृतभारत् एक्स्प्रेस् इत्येते च। ह्यः प्रधानमन्त्री मोदी पश्चिमबङ्गालराज्यस्य माल्दानगरे सार्धद्विशतोत्तरत्रि-सहस्र कोटिरूप्यकाणां विकासपरियोजनानां उद्घाटनम्, शिलान्यासं च अकरोत्। जनसमूहमेकं सम्बोधयन्, प्रधानमन्त्री अवदत् यत्, रेलयानं विकसित्-भारतस्य दृष्टिं प्रतिबिम्बयति, तथा च मेड्-इन्-इण्डिया इति उपक्रमान्तर्गतं भारतस्य वर्धमान-प्रौद्योगिकीय-क्षमतानां प्रदर्शनमपि करोतीति।

<u>पीएम-मालदा रैलीः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना तृणमूल्-काङ्ग्रेस्-सर्वकारस्य उपरि कठोराक्रमणं कुर्वन्, उक्तं यत् अवैधप्रवासं राज्यस्य गभीररतमा समस्या अस्तीति।

<u>डी. जी. सी. ए.-इण्डिगो दण्डः</u>

नागरिक-विमानयान-नियन्त्रण-महानिदेशालयः गतवर्षस्य डिसेम्बर्-मासस्य आरम्भे इण्डिगो इत्याख्यया विमान-प्रचालन संस्थया बृहत्-परिमाणे यानानां विलम्बन-निरस्तीकरणं कृतामिति विषयमवलम्ब्य इण्डिगो-संस्थायाः उपरि विंशत्युत्तर-द्वाविंशति कोटि-रूप्यकाणां दण्डं आरोपितवान्।

## CAQM-GRAP 4:

राष्ट्रियराजधानीति क्षेत्रं दिल्ली अथ समीपस्थेषु क्षेत्रेषु वायु-गुणवत्ता-प्रबन्धन-आयोगेन तत्क्षणप्रभावेन ग्रेडेड्-रेस्पान्स्-एक्शन्-प्लान् इत्यस्य चतुर्थं चरणं प्रारब्धम्। दिल्ली-नगरस्य वायुगुणसूचकाङ्कः ह्यः चतुश्शततमाङ्कं संस्पृश्य वायोः वातावरणम् अतिदुर्बल-वर्गे स्थापितम्, ततः परं अयं निर्णयः कृतः। प्रतिबन्धान्तर्गतं, आवश्यकवस्तूनि वहन्तुं, आवश्यकसेवाः प्रदातुञ्च प्रचाल्यमानानि वाहनानि विहाय, दिल्ली-नगरे बी. एस्.-4 इत्यस्य ट्रक्-यानानां प्रवेशः प्रतिषिद्धः अस्ति।

## JEE MAIN परीक्षा प्रवेशपत्रः

राष्ट्रीय परीक्षण आयोगेन जेईई मेन 2026 इत्यस्यै परीक्षायै प्रवेशपत्राणि प्रकाशितानि। प्रवेशपत्राणि आयोगस्य आधिकारिकं जालपुटं jeemain.nta.nic.in इत्यत्र गत्वा प्राप्तुं शक्यन्ते।

## प्रधानमन्त्री विश्वकर्मा विपणिः

अद्यारभ्य सर्वकारः राष्ट्रिय-राजधान्यां पी. एम्. विश्वकर्मा-हाट 2026 इति प्रदर्शन्याः आयोजनं करिष्यति। प्रदर्शनी विशेषतया प्रधानमन्त्रि-विश्वकर्मा-योजनायाः अन्तर्गतं शिल्पानां शिल्पकाराणां च कृते समर्पिता अस्ति, तथा च देशस्य पारम्परिक-शिल्पकलायाः समृद्धां परम्परां उत्सवीकर्तुं च लक्ष्यते। प्रदर्शनस्य उद्घाटनं केन्द्रीय-सूक्ष्म-लघु-मध्यम-उद्यम-मन्त्रिणा जितनराममाञ्झी इत्यनेन करिष्यते।

## बी. सी. सी. आई. महिलानां ओ. डी. आई. अथ टी-20 दले

बी. सी. सी. आई. इत्यनेन फेब्रुवरी-मार्च्-मासयोः आस्ट्रेलिया-प्रवासाय भारतस्य महिला-दलस्य घोषणा कृता अस्ति। हर्मन्प्रीत् कौर् टी-20आई अथ ओ. डी. आई. श्रृङ्खलयोः भारतस्य नेतृत्वं करिष्यति, स्मृति मन्धाना उपनायिकारूपेण नियुक्ता भविष्यति। भारतीयक्रिकेटदलम् एकदिवसीय-विश्वचषक-विजेतृदलमस्ति।

## क्रेकेटक्रीडा

आई. सी. सी. इत्यस्य पुरुषाणां अन्तः नवदशवयवर्गीय-क्रिकेट्-विश्वचषक-क्रीडायां गतरात्रौ जिम्बाब्वे-देशस्य बुलावायो-नगरे वृष्ट्या बाधितायां ग्रूप्-ए इत्यस्यां क्रीडायां डी. एल्. एस्.-पद्धत्या भारतेन बाङ्ग्लादेशः अष्टादश धावनाङ्कैः पराजयत। पुरुष-क्रिकेट्-क्रीडायां, अद्य इन्दोर-नगरे श्रृङ्खलायाः निर्णायिकायां तृतीयायां तथा अन्तिमायां ओ. डी. आई.-क्रीडायां आतिथेय-भारतं न्यूज़ीलैण्ड्-देशेन सह क्रीडिष्यति। क्रीडा अपराह्णे सार्धैक-वादने आरप्स्यते।